"धर्म्मात्मा स तु गाङ्गेयश्चिन्ताशोकपरायणः ।
प्रेतकार्य्याणि सर्व्वाणि तस्य सम्यगकारयत् ॥")

प्रेतगृहं, क्ली, (प्रेतस्य गृहम् ।) श्मशानम् । इति हेमचन्द्रः । ४ । ५५ ॥

प्रेततर्पणं, क्ली, (प्रेतस्य तर्पणम् ।) मरणावधि-सपिण्डीकरणपर्य्यन्तं प्रेतशब्दोल्लेखेन जलदानम् । यथा । "अत्र प्रेततर्पणे तिलाञ्जलिं विशेषोपादानात् सूर्य्यादिवारेणापि तिलैरेव तर्पणं प्रतीयते ॥ तदनुष्ठानं यथा । अथ सर्व्वे शवस्पर्शिनो गत्वा पितृपदस्थाने प्रेतपदोहेन द्वितीयान्तं तर्पयेयुः पितृशब्दोच्चारणेऽपि पितृत्वा भवति । एतेन अमुकगोत्रं प्रेतं अमुकदेवशर्म्माणं तर्पयामि । इति सामगानां प्रयोगः । यजुर्व्वेदिनान्तु अमुकगोत्र प्रेत अमुकदेवशर्म्मन् तृप्यस्व । इति सम्बोधनान्तवाक्यम् ।" इति शुद्धितत्त्वम् ॥

प्रेतदेहः, पुं क्ली, (प्रेतस्य देहः ।) प्रेतशरीरम् । यथा,—
"कृते सपिण्डीकरणे नरः संवत्सरात् परम् ।
प्रेतदेहं परित्यज्य भोगदेहं प्रपद्यते ॥"
इति तिथ्यादितत्त्वधृतविष्णुधर्म्मोत्तरीयवचनम् ॥ पूरकपिण्डदानेन तदुत्पत्तिर्यथा,—
"शिरस्त्वाद्येन पिण्डेन प्रेतस्य क्रियते सदा ।
द्वितीयेन तु कर्णाक्षिनासिकास्तु समासतः ॥
गलांसभुजवक्षांसि तृतीयेन यथाक्रमात् ।
चतुर्थेन तु पिण्डेन नाभिलिङ्गगुदानि च ॥
जानुजङ्घे तथा पादौ पञ्चमेन तु सर्व्वदा ।
सर्व्वमर्म्माणि षष्ठेन सप्तमेन तु नाड़यः ॥
दन्तलोमाद्यष्टमेन वीर्य्यञ्च नवमेन तु ।
दशमेन च पूर्णत्वं तृप्तता क्षुद्विपर्य्ययः ॥"
इति शुद्धितत्त्वधृतकूर्म्मपुराणवचनम् ॥

प्रेतनदी, स्त्री, (प्रेततरणीया नदी ।) वैतरणी । इति शब्दरत्नावली ॥

प्रेतपक्षः, पुं, (प्रेतप्रियः पक्षः ।) गौणचान्द्राश्विनकृष्णपक्षः । तत्र मृतस्य पार्व्वणविधिना सांवत्सरिकं श्राद्धं कर्त्तव्यम् । यथा,—
"आषाढ्याः पञ्चमे पक्षे कन्यासंस्थे दिवाकरे ।
यो वै श्राद्धं नरः कुर्य्यादेकस्मिन्नपि वासरे ॥
तस्य संवत्सरं यावत्तृप्ताः स्युः पितरो ध्रुवम् ॥
नभा वाथ नभस्यो वा मलमासो यदा भवेत् ।
सप्तमः पितृपक्षः स्यादन्यत्रैव तु पञ्चमः ॥" इति ।
तत्र मृतस्य ।
"सपिण्डीकरणादूर्द्ध्वं यत्र यत्र प्रदीयते ।
तत्र तत्र त्रयं कुर्य्याद्वर्ज्जयित्वा मृताहनि ॥
अमावास्यां क्षयो यस्य प्रेतपक्षेऽथवा पुनः ।
सपिण्डीकरणादूर्द्ध्वं तस्योक्तः पार्व्वणो विधिः ॥"
इति शङ्खोक्तेन प्रत्याब्दिकं पार्व्वणविधिना कर्त्तव्यम् । इति मलमासतत्त्वम् ॥ * ॥ तत्र निषिद्धदिनेऽपि तिलतर्पणं कर्त्तव्यम् । यथा, स्मृतिः ।
"तीर्थे तिथिविशेषे च गङ्गायां प्रेतपक्षके ।
निषिद्धेऽपि दिने कुर्य्यात् तर्पणं तिलमिश्रितम् ॥"
इति च मलमासतत्त्वम् ॥

प्रेतपटहः, पुं, (प्रेतस्य पटहः ।) मरणकाले वादनीयवाद्यविशेषः । तत्पर्य्यायः । भवरुत् २ मृत्युभङ्करकः ३ । इति त्रिकाण्डशेषः ॥

प्रेतपतिः, पुं, (प्रेतानां पतिः ।) यमः । इति हलायुधः ॥ (यथा, मार्कण्डेये । १०८ । ४ ।
"दण्डः प्रेतपतेः शक्तिर्द्देवसेनापतेस्तथा ।
अन्येषाञ्चैव देवानामायुधानि स विश्वकृत् ।
चकार तेजसा भानोर्भासुराण्यरिशान्तये ॥")

प्रेतपिण्डः, पुं, (प्रेताय देयः पिण्डः ।) मरणावधि-सपिण्डीकरणपर्य्यन्तं प्रेतसम्प्रदानकपिण्डाकारान्नम् । यथा,—
"न स्वधाञ्च प्रयुञ्जीत प्रेतपिण्डे दशाहिके ।
भावितेतच्च वै पिण्डं यन्नदत्तस्य पूरकम् ॥" * ॥
तत्तत्पिण्डस्य प्रेताङ्गकरणत्वं यथा, ब्रह्मपुराणे ।
"शिरस्त्वाद्येन पिण्डेन प्रेतस्य क्रियते सदा ।
द्वितीयेन तु कर्णाक्षिनासिकास्तु समासतः ॥
गलांसभुजवक्षांसि तृतीयेन तथा क्रमात् ।
चतुर्थेन तु पिण्डेन नाभिलिङ्गगुदानि च ॥
जानुजङ्घे तथा पादौ पञ्चमेन तु सर्व्वदा ।
सर्व्वमर्म्माणि षष्ठेन सप्तमेन तु नाड़यः ॥
दन्तलोमाद्यष्टमेन वीर्य्यञ्च नवमेन तु ।
दशमेन तु पूर्णत्वं तृप्तता क्षुद्विपर्य्ययः ॥" * ॥
तदकरणे दोषो यथा,—
"प्रेतपिण्डा न दीयन्ते यस्य तस्य विमोक्षणम् ।
श्मशानिकेभ्यो देवेभ्य आकल्पं नैव विद्यते ॥" * ॥
पूरकपिण्डदानादेरितिकर्त्तव्यता यथा । पारस्करः । प्रेताय पिण्डं दत्त्वा अवनेजनदानप्रत्यवनेजनेषु नामग्राहं न्याये तां रात्रिं विहायसि क्षीरोदके निदध्युः प्रेतात्र स्नाहि पिब चेदं क्षीरमित्युच्चार्य्येति । अत्र दानशब्देन पिण्डदानमुक्तं बहुवचनात् । तेनावनेजनपिण्डदानप्रत्यवनेजनेषु नामग्राहं नाम गृहीत्वा प्रेतपिण्डानुष्ठानं समाप्यम् । विहायसि रात्रौ क्षीरोदके प्रेतात्र स्नाहि पिब चेदं क्षीरमित्युच्चार्य्य निदध्युः ।
"प्रथमेऽहनि यो दद्यात् प्रेतायान्नं समाहितः ।
यन्नान्नवस्तु चान्येषु स एव प्रददात्यपि ॥" * ॥
प्रथमपिण्डकर्त्तृनियमवत् प्रथमपिण्डद्रव्यनियममाह शुनः पुष्कः ।
"प्रथमेऽहनि यद्द्रव्यं तदेव स्याद्दशाहिकम् ।
सद्यःशौचेऽपि दातव्याः सर्व्वेऽपि युगपत्तथा ॥
त्र्याहाशौचे प्रदातव्याः प्रथमे त्वेक एव हि ।
द्वितीयेऽहनि चत्वारस्तृतीये पञ्च चैव हि ॥
एकस्तोयाञ्जलिस्त्वेवं पात्रमेकञ्च दीयते ।
द्वितीये द्वौ तृतीये त्रीन् चतुर्थे चतुरस्तथा ॥
पञ्चमे पञ्च षष्ठे षट् सप्तमे सप्त एव च ।
अष्टमेऽष्टौ च नवमे नवैव दशमे दश ॥
येन स्युः पञ्चपञ्चाशत् तोयस्याञ्जलयः क्रमात् ।
तोयपात्राणि तावन्ति संयुक्तानि तिलादिभिः ॥"
इति शुद्धितत्त्वम् ॥

प्रेतपुरं, क्ली, (प्रेतानां पुरम् ।) यमालयः । यथा,
"यावच्च कन्यातुलयोः क्रमादास्ते दिवाकरः ।
तावत् श्राद्धस्य कालः स्यात् शून्यं प्रेतपुरं तदा ॥"
इति श्राद्धतत्त्वम् ॥

प्रेतराक्षसी, स्त्री, (प्रेतानां पिशाचभेदानां राक्षसीवापसर्पणकारित्वात् ।) तुलसी । इति रत्नमाला ॥

प्रेतवनं, क्ली, (प्रेतानां वनमिव ।) श्मशानम् । इति हेमचन्द्रः । ४ । ५५ ॥

प्रेतवाहितः, त्रि, (प्रेतेन वाहितः ।) भूताविष्टः । इति त्रिकाण्डशेषः ॥

प्रेतशिला, स्त्री, (प्रेतानां प्रेतेभ्यो वा या शिला ।) पिण्डदानार्थगयास्थितप्रस्तरविशेषः । यथा,—
ब्रह्मोवाच ।
"येयं प्रेतशिला ख्याता गयायां सा त्रिधा स्थिता ।
प्रभासे प्रेतकुण्डे च गयासुरशिरस्यपि ॥
धर्म्मेण धारिता भूत्यै सर्व्वदेवमयी शिला ॥
प्रेतत्वं ये गता नृणां पित्राद्या बान्धवादयः ।
तेषामुद्धरणार्थाय यतः प्रेतशिला ततः ॥
अतोऽत्र मुनयो भूपा राजपत्न्यादयः सदा ।
तस्यां शिलायां श्राद्धादिकर्त्तारो ब्रह्मलोकगाः ॥
गयासुरस्य यन्मुण्डं तस्य पृष्ठे शिला यतः ।
मुण्डपृष्ठो गिरिस्तस्मात् सर्व्वदेवमयो ह्ययम् ॥
मुण्डपृष्ठस्य पादेषु यतो ब्रह्मसरोमुखाः ।
अरविन्दवनन्तेषु तेन चैवोपलक्षितः ॥
अरविन्दो गिरिर्नाम क्रौञ्चपादाङ्कितो यतः ।
तस्माद्गिरिः क्रौञ्चपदः पितॄणां ब्रह्मलोकदः ॥
गदाधराद्यो देवा आद्या आदौ व्यवस्थिताः ।
शिलारूपेण च व्यक्तास्तस्माद्देवमयी शिला ।
गयाशिरश्छादयित्वा गुरुत्वादास्थिता शिला ॥ * ॥
स्नात्वा प्रेतशिलादौ तु वरुणामुक्तेन च ।
पिण्डं दद्यादिमैर्म्मन्त्रैरावाह्य च पितॄन् परान् ॥
अस्मत्कुले मृता ये च गतिर्येषां न विद्यते ।
तेषामावाहयिष्यामि दर्भपृष्ठे तिलोदकैः ॥
पितृवंशे मृता ये च मातृवंशे च ये मृताः ।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥
मातामहकुले ये च गतिर्येषां न जायते ।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥
अजातदन्ता ये केचित् ये च गर्भेषु पीड़िताः ।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥
बन्धुवर्गाश्च ये केचिन्नामगोत्रविवर्ज्जिताः ।
स्वगोत्रे परगोत्रे वा गतिर्येषां न विद्यते ।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥
उद्बन्धनमृता ये च विषशस्त्रहताश्च ये ।
आत्मोपघातिनो ये च तेभ्यः पिण्डं ददाम्यहम् ॥
अग्निदाहे मृता ये च सिंहव्याघ्रहताश्च ये ।
दंष्ट्रिभिः शृङ्गिभिर्व्वापि तेषां पिण्डं ददाम्यहम् ॥
अग्निदग्धाश्च ये केचिन्नाग्निदग्धास्तथापरे ।
विद्युच्चौरहता ये च तेषां पिण्डं ददाम्यहम् ॥
रौरवे चान्धतामिस्रे कालसूत्रे च ये गताः ।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥
असिपत्रवने घोरे कुम्भीपाके च ये गताः ।
तेषामुद्धरणार्थाय इमं पिण्डं ददाम्यहम् ॥
अन्येषां यातनास्थानां प्रेतलोकनिवासिनाम् ।